व्यवहृपणोः समर्थयोः । (५७/६१८)

व्यवहृ पण इत्येतयोः समर्थयोः समानार्थयोः कर्मणि कारके षष्ठी विभक्तिर्भवति । द्यूते [1]क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः । शतस्य [2]व्यवहरति । [3]सहस्रस्य व्यवहरति । [4]शतस्य पणते । सहस्रस्य पणते । [5]आयप्रत्ययः कस्मान्न भवति ? [6]स्तुत्यर्थस्य [7]पणतेरायप्रत्यय इष्यते[8] । समर्थयोः इति किम् ? शलाकां व्यवहरति । [9]विक्षिपति इत्यर्थः । ब्राह्मणान् [10]पणायते । स्तौति इत्यर्थः । शेषे इत्येव, [11]शतं पणते[12] ॥

दिवस्तदर्थस्य । (५८/६१९)

व्यवहृ[13]पणिसमानार्थस्य दीव्यतेः कर्मणि[14] षष्ठी विभक्तिर्भवति । शतस्य दीव्यति । सहस्रस्य दीव्यति । [15]तदर्थस्य इति किम् ? [16]ब्राह्मणं दीव्यति । योगविभाग उत्तरार्थः ॥

विभाषोपसर्गे । (५९/६२०)

'दिवस्तदर्थस्य' (२.३.५८/६१९) इति [17]नित्यं षष्ठ्यां प्राप्तायां सोपसर्गस्य विकल्प उच्यते । उपसर्गे [18]सति दिवस्तदर्थस्य कर्मणि [19]कारके विभाषा षष्ठी विभक्तिर्भवति । [20]शतस्य प्रतिदीव्यति । सहस्रस्य प्रतिदीव्यति । [21]शतं प्रतिदीव्यति । सहस्रं प्रतिदीव्यति । उपसर्गे इति किम् ? शतस्य दीव्यति । तदर्थस्य इत्येव शलाकां प्रतिदीव्यति ॥

द्वितीया ब्राह्मणे । (६०/३३९५)

ब्राह्मणविषये[22]प्रयोगे दिवस्तदर्थस्य कर्मणि [23]कारके द्वितीया विभक्तिर्भवति । '[24]गामस्य तदहः सभायां दीव्येयुः' (मै. सं. १.६.११.५६) । [25]अनुपसर्गस्य षष्ठ्यां प्राप्तायामिदं वचनम् । सोपसर्गस्य [26]तु छन्दसि व्यवस्थितविभाषयाऽपि सिध्यति ॥

प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने । (६१/६२१)

प्रेष्य इति [27]इष्यतेर्दैवादिकस्य लोण्मध्यमपुरुषस्यैकवचनम्, तत्साहचर्याद् ब्रुविरपि तद्विषय एव [28]गृह्यते । प्रेष्यब्रुवोर्हविषः [29]कर्मणः षष्ठी विभक्तिर्भवति [30]देवतासम्प्रदाने सति । '[31]अग्नये छागस्य हविषो वपाया मेदसः प्रे३ष्य' (का. श्रौ. ६. ६. २६) । '[32]अग्नये छागस्य हविषो वपायै मेदसोऽनुब्रूहि३' (का. श्रौ. ६. ६. २०) । प्रेष्यब्रुवोः इति किम् ? 'अग्नये छागं हविर्वपां मेदो जुहुधि' (का.श्रौ. ६.६.२३) । हविषः इति किम्? 'अग्नये [33]गोमयानि प्रेष्य' (श.ब्रा. १२.५.२.३) । देवतासम्प्रदाने इति किम् ? माणवकाय पुरोडाशं प्रेष्य ।

[१४१] हविषः प्रस्थितस्य प्रतिषेधो वक्तव्यः । (म. भा. १. ४६६)

'[34]इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य३' (का. श्रौ. ६.६.२३) ॥

---

1. क्रयविक्रये क. ड. ह. 2. व्यवहरते क. ड. 3. उदाहरणमिदं नास्ति क. 4. उदाहरणमिदं नास्ति ह. 5. पणतेः इत्यधिकम् ड. 6. श्रुत्यर्थस्य ह. 7. पणेः फ. 8. न तु व्यवहारार्थस्य इत्यधिकम् अ. 9. परिगणयति क. ड, नास्ति ब.ई. 10. पणायति क. ड. फ. ह. 11. सहस्रं ड.इ, शते पणते ह. 12. शतं व्यवहरति इत्यधिकम् क. ड. फ. ग. 13. °पणेः इ, °पणोः ह. 14. कारके इत्यधिकम् क.ड.फ.ह. 15. तदनर्थस्य फ. 16. ब्राह्मणो दीव्यति फ, ब्राह्मणान् प्रति दीव्यति ड, ब्राह्मणान् दीव्यति ह, ब्राह्मणस्य दीव्यति क. 17. नित्यं नास्ति क. ह. 18. सति नास्ति ह. 19. कारके नास्ति ब. फ. ह. 20. उदाहरणमिदं नास्ति ग. 21. उदाहरणमिदं नास्ति फ. 22. °विषयप्रयोगे इ. 23. कारके नास्ति फ. 24. ग्रामस्य ब. क. ड. इ. फ. ह. ग. 25. नित्यं इत्यधिकम् क. ड. फ. 26. तु नास्ति ड. 27. ईष्यतेः क, प्रेष्यतेः इ. 28. उदाह्रियते ह. 29. कर्मणि ड, कर्मणि कारके ह. 30. देवतायां क. ड. 31–32. अग्नये नास्ति ह. 33. गोमयानिति इ. 34. इन्द्राग्नीभ्यां इ.